| अथ प्रकीर्णकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णोदानम्। | दक्षिणा। |
|---|---|---|---|---|
| | मरणान्तिकं प्रायश्चित्तं तत्र रहस्यहतेऽपि मरणमेव कर्त्तव्यम्। यत्र तु व्रतादिकं तत्र जातिशक्तिगुणसत्त्वबुद्ध्याद्यपेक्षया प्रकाशकृतपापोक्तप्रायश्चित्तस्य विंशतिभागत्रिंशद्भागषष्टिभागाः कल्प्याः। | | | |
| | अथवा महापातकिष्वकामतो मनूक्तमाब्दिकं व्रतं करणीयम्। | १५ धेनवः। | ४५ कार्षापणाः। | ६ गावः। अशक्तौ ८।८६॥ कार्षापणाः। |
| | कामतो द्वैगुण्यम्। | ३० धेनवः। | ६० कार्षापणाः। | १० गावः। अशक्तौ १६॥८१३॥ कार्षापणाः। |
| | अन्येषु पापेषु गुरुलाघवापेक्षया प्राणायामशतमेव एकाहद्व्यहत्र्यहक्रमेण मासं षण्मासं संवत्सरं वाभ्यसनीयम्। व्रतकरणाशक्तेनापि जपहोमध्यानतीर्थसेवादानवेदाभ्यासादयः कार्य्याः। इति रहस्यप्रायश्चित्तम्॥ | | | |

इति शूलपाणिकृतप्रायश्चित्तविवेकोक्तनवविधपापानां प्रायश्चित्तानि समाप्तानि ॥ * ॥

प्रायिकं, त्रि, (प्रायेण प्राये वा भवमिति। प्राय + ठक्।) बाहुल्ये भवम्। यथा। "चैत्यशाने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणादिकम्।" इति प्रायश्चित्ततत्त्वम्॥

प्राशुद्धेषी, [न्] पुं, (प्राशुधि प्रकृष्टयुद्धादिस्थाने हेषते शब्दायते इति। हेष् + णिनिः।) घोटकः। इति शब्दचन्द्रिका॥

प्रायोण्यं, त्रि, (प्र + आ + युज् + णिच् + यत्।) प्रयोजनार्हम्। यथा। प्रायोण्यं न विभज्येत। यद्द्रव्यस्य प्रयोजनार्हं पुस्तकादि तन्मूल्यैः सह न विभजनीयमिति दायभागः॥

प्रायोपविष्टः, त्रि, (प्रायेण मरणार्थमनशनेन उपविष्टः।) प्रायोपवेशविशिष्टः। यथा,—
"प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः॥"
इति श्रीभागवतम्।
"प्रायेण मृत्युपर्य्यन्तानशनेनोपविष्टम्।" इति तट्टीकायां श्रीधरस्वामी॥

प्रायोपवेशः, पुं, (प्रायेण मृत्युनिमित्तकानशनेन उपवेशः स्थितिः।) सन्न्यासपूर्व्वकानशनस्थितिः। यथा,—
"प्रायोपवेशो राजर्षेर्विप्रशापात् परीक्षितः॥"
इति श्रीभागवते १२ स्कन्धः॥

प्रारब्धं, क्ली, (प्रकृष्टमारब्धं स्वकार्य्यजननायेति।) प्राक्तनम्। शरीरारम्भकादृष्टविशेषः। यथा,—
"प्रारब्धकर्म्मणां भोगादेव क्षयः॥" इति स्मृतिः।
"प्रारब्धमत्रमभिमानशून्यः।"
इति श्रीभागवतम्॥
"प्रारब्धकर्म्मविक्षेपाद्वासना तु न नश्यति॥"
इति भगवद्गीतायां मधुसूदनसरस्वती च॥
(प्र + आ + रभ् + कर्म्मणि क्तः। कृतारम्भे, त्रि। यथा, रघौ। १४। ७।
"अथाभिषेकं रघुवंशकेतोः
प्रारब्धमानन्दजलैर्जनन्योः।
निर्व्वर्त्तयामासुरमात्यवृद्धा-
स्तीर्थाहृतैः काञ्चनकुम्भतोयैः॥")

प्रारब्धिः, स्त्री, (प्र + आ + रभ् + क्तिन्।) गजबन्धनरज्जुः। इति हारावली॥

प्रारम्भः, पुं, (प्र + आ + रभ् + भावे घञ्। मुम् च।) प्रकर्षेण आरम्भः। यथा, स्मृतिः।
"प्रारम्भे कर्म्मणां विप्रः पुण्डरीकं स्मरेद्धरिम्॥"
(प्रारभ्यते इति। प्र + आ + रभ् + कर्म्मणि घञ्। मुम् च। कर्म्म। यथा, मार्कण्डेयपुराणे। ५१। १७।
"शुभाशुभञ्च कुशलैः कुमारोऽन्यो ब्रवीति वै।
तत्रापि दुष्टे व्याक्षेपः प्रारम्भत्याग एव च॥"
प्रकृष्ट आरम्भो योगो यस्येति विग्रहे। योगी। यथा, रघुः। १०। ६।
"प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्।
दिवसं शारदमिव प्रारम्भसुखदर्शनम्॥")

प्रार्थनं, क्ली, (प्र + अर्थ + ल्युट्।) प्रकर्षेण याचनम्। तत्पर्य्यायः। याच्ञा २ अभिशस्तिः ३ याचना ४ अर्थना ५ प्रार्थना ६। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। १४६। ३७।
"युगक्षयकृता धर्म्माः प्रार्थनानि विकुर्व्वते।
एतत् कलियुगं नाम अचिराद् यत् प्रवर्त्तते॥")

प्रार्थना, स्त्री, (प्र + अर्थ + णिच् + युच्।) प्रकर्षेण याचनम्। (यथा, महाभारते। ३। ३१२। ८१।
"कस्मो दिग्जलमाकाशं गौरन्नं प्रार्थना विषम्।
श्राद्धस्य ब्राह्मणः कालः कथं वा यक्ष! मन्यसे॥")

प्रार्थनीयं, क्ली, (प्रार्थ्यते इति। प्र + अर्थ + णिच् + अनीयर्।) द्वापरयुगम्। इति शब्दरत्नावली॥ प्रार्थनाविषये, त्रि॥ (यथा, पञ्चतन्त्रे। २। ११६।
"ततस्तयोः स्वभूपं वृद्धा एकस्य वरः प्रार्थनीयः॥")

प्रार्थितः, त्रि, (प्रार्थ्यते स्मेति। प्र + अर्थ + क्तः।) याचितः। (यथा, देवीभागवते। २। ६। ५६।
"प्रार्थिता पतिना कुन्ती ददौ मन्त्रं दयान्विता।
एकपुत्त्रप्रबन्धेन माद्री पतिमते स्थिता॥")
शत्रुसंरुद्धः। अभिहितः। इति मेदिनी॥ हतः। इति त्रिकाण्डशेषः॥

प्रालम्बं, क्ली, (प्रालम्बते इति। लबि अवस्रंसने + अच्।) कण्ठात् ऋजुलम्बमानमाल्यम्। इत्यमरः। २। ६। १३६॥ (यथा, रघौ। ६। १४।
"विस्रस्तमंसादपरो विलासी
रत्नानुविद्धाङ्गदकोटिलग्नम्।
प्रालम्बमुत्कृष्य यथावकाशं
निनाय साचीकृतचारुवक्त्रः॥"
प्रकर्षेण लम्बमाने, त्रि॥)

प्रालम्बिका, स्त्री, (प्रालम्बते इति। अच्। संज्ञायां कन्। टापि अत इत्वम्।) स्वर्णरचितलम्बिका। सुवर्णहारः। इत्यमरः। २। ६। १०४॥

प्रालेयं, क्ली, (प्रकर्षेण लीयन्ते लीना भवन्ति पदार्था अत्रेति प्रलयो हिमालयस्तत आगतम्। प्रलय + अण्। "केकयमित्रयुप्रलयानां यादेरियः।" ७। ३। २। इति यस्येयादेशः।) हिमम्। इत्यमरः। १। ३। १८॥ (यथा, देवीभागवते। ४। ५। १३।
"नरनारायणौ चैव चेरतुस्तप उत्तमम्।
प्रालेयाद्रिं समागत्य तीर्थे वदरिकाश्रमे॥")